न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा ।

इति मां योऽभिजानाति कर्मभिर्न स बध्यते ॥ ४.१४ ॥

na māṁ karmāṇi limpanti na me karmaphale spṛhā |
iti māṁ yo'bhijānāti karmabhirna sa badhyate || 4.14||

एवं ज्ञात्वा कृतं कर्म पूर्वैरपि मुमुक्शुभिः ।

कुरु कर्मैव तस्मात्त्वं पूर्वैः पूर्वतरं कृतम् ॥ ४.१५ ॥

evaṁ jñātvā kṛtaṁ karma pūrvairapi mumukśubhiḥ |
kuru karmaiva tasmāttvaṁ pūrvaiḥ pūrvataraṁ kṛtam || 4.15||

किं कर्म किमकर्मेति कवयोऽप्यत्र मोहिताः ।

तत्ते कर्म प्रवक्श्यामि यज्ज्ञात्वा मोक्श्यसेऽशुभात् ॥ ४.१६ ॥

kiṁ karma kimakarmeti kavayo'pyatra mohitāḥ |
tatte karma pravakśyāmi yajjñātvā mokśyase'śubhāt || 4.16||

कर्मणो ह्यपि बोद्धव्यं बोद्धव्यं च विकर्मणः ।

अकर्मणश्च बोद्धव्यं गहना कर्मणो गतिः ॥ ४.१७ ॥

karmaṇo hyapi boddhavyaṁ boddhavyaṁ ca vikarmaṇaḥ |
akarmaṇaśca boddhavyaṁ gahanā karmaṇo gatiḥ || 4.17||